## कारनाम्नि च प्राचां हलादौ । (१०/९६८)

प्राचां देशे यत्कारनाम तत्र हलादावुत्तरपदे हलदन्तादुत्तरस्याः सप्तम्याः अलुग् भवति। सूपेशाणः । [1]दृषदिमाषकः । हलेद्विपदिका । हलेत्रिपदिका । कारशिषस्य सञ्ज्ञा एताः, तत्र पूर्वेणैव सिद्धे नियमार्थमिदम्[2] । एते च [3]त्रयो नियमविकल्पा अत्रेष्यन्ते, कारनाम्न्येव, प्राचामेव, हलादावेव इति । कारनाम्नि इति किम् ? अभ्यर्हिते पशुः [4]अभ्यर्हितपशुः । [5]कारादन्यस्यैतद्द्येयस्य नाम । प्राचाम् इति किम् ? यूथे पशुः यूथपशुः । हलादौ इति किम् ? अविकटे उरणः अविकटोरणः (म. भा. ३. १४५) । हलदन्तादित्येव, [6]नद्यां दोहनी नदीदोहनी ॥

## मध्याद् गुरौ । (११/९६९)

मध्यादुत्तरस्याः सप्तम्याः गुरावुत्तरपदेऽलुग् भवति । मध्येगुरुः ।

[७२०] अन्ताच्चेति वक्तव्यम् । (म. भा. ३. १४५)

अन्तेगुरुः । सप्तमी इति योगविभागात् समासः ॥

## अमूर्धमस्तकात् स्वाङ्गादकामे । (१२/९७०)

[7]मूर्धमस्तकवर्जितात् [8]स्वाङ्गादुत्तरस्याः सप्तम्याः अकामे उत्तरपदे[9]ऽलुग् भवति । कण्ठे कालोऽस्य कण्ठेकालः । उरसिलोमा । उदरेमणिः । अमूर्धमस्तकात् इति किम् ? मूर्धशिखः । मस्तकशिखः । अकामे इति किम् ? मुखे कामोऽस्य मुखकामः । स्वाङ्गात् इति किम् ? अक्षशौण्डः । हलदन्तात् इत्येव, अङ्गुलित्राणः । जङ्घावलिः ॥

## बन्धे च विभाषा । (१३/९७१)

बन्धः इति घञन्तो गृह्यते । तस्मिन्नुत्तरपदे हलदन्तादुत्तरस्याः [10]सप्तम्याः विभाषा अलुग् भवति । हस्तेबन्धः, हस्तबन्धः । [11]चक्रेबन्धः, चक्रबन्धः । उभयत्रविभाषेयम् । स्वाङ्गाद्धि बहुव्रीहौ पूर्वेण नित्यमलुक् प्राप्नोति, [12]तत्पुरुषे तु[13] स्वाङ्गादस्वाङ्गाच्च 'नेन्सिद्धबध्नातिषु च' (६. ३. १९/९७७) इति प्रतिषेधः प्राप्नोति । हलदन्तादित्येव, गुप्तिबन्धः[14] ॥

## तत्पुरुषे कृति बहुलम् । (१४/९७२)

तत्पुरुषे समासे कृदन्ते उत्तरपदे[15] सप्तम्याः बहुलमलुग् भवति । स्तम्बेरमः । कर्णेजपः । न च भवति । कुरुचरः । मद्रचरः ॥

---

1. मुकुटेकार्षापणः फ. 2. वचनम् इत्यधिकम् फ. ह. 3. त्रयो नास्ति फ. 4. नास्ति फ. 5. कारादन्यस्य तादर्थ्ये फ. 6. दध्नि दोहः दधिदोहः ह. 7. मस्तकशब्दवर्जितात् फ.ह. 8. स्वाङ्गवाचिनः परस्य फ. 9. परतः इत्यधिकम् ह. 10. सप्तम्याः नास्ति फ. 11. चारकेबन्धः फ. 12. वाक्यमिदं नास्ति फ. 13. तत्सिद्धेश्च नादिभुवेति इत्यधिकम् फ. 14. कारिकाबन्धः इत्यधिकम् ब. 15. परतः इत्यधिकम् फ.